## ख च। (१३२/३४७८)

वेशोयशआदेर्भगान्तात् प्रातिपदिकात् मत्वर्थे खः प्रत्ययो भवति। [1]योगविभागो यथासङ्ख्यनिरासार्थः उत्तरार्थश्च। [2]चकारात् यत्। [3]वेशोभगीनः, [4]वेशोभग्यः। [5]यशोभगीनः, यशोभग्यः॥

## पूर्वैः कृतमिनयौ च। (१३३/३४७९)

[6]मत्वर्थे इति निवृत्तम्। निर्देशादेव समर्थविभक्तिः। पूर्वशब्दात् तृतीयासमर्थात् कृतम् इत्येतस्मिन्नर्थे इन य इत्येतौ प्रत्ययौ भवतः। चकारात् ख च। 'गम्भीरेभिः पथिभिः पूर्विणेभिः' (काठ. सं. ९.६.१९)। 'पूर्व्यैः' (तै. १.८.५.२)। पूर्वीणैः। पूर्वैः इति बहुवचनान्तेन पूर्वपुरुषाः उच्यन्ते। तत्कृताः पन्थानः प्रशस्ता इति पथां प्रशंसा॥

## अद्भिः संस्कृतम्। (१३४/३४८०)

निर्देशादेव समर्थविभक्तिः। अप्शब्दात् तृतीयासमर्थात् संस्कृतम् इत्येतस्मिन्नर्थे यत् प्रत्ययो भवति। 'यस्येदमप्यं हविः' (ऋ. १०.८६.१२)। [7]अद्भिः संस्कृतम् [8]इति॥

## सहस्रेण संमितौ घः। (१३५/३४८१)

निर्देशादेव समर्थविभक्तिः। सहस्रशब्दात् तृतीयासमर्थात् [9]सम्मितौ इत्येतस्मिन्नर्थे घः प्रत्ययो भवति। सम्मितः तुल्यः, सदृशः। 'अयमग्निः सहस्त्रियः' (तै. सं. ४.७.१३.४)। [10]सहस्रतुल्यः इत्यर्थः। केचित्तु समितौ इति पठन्ति। तत्रापि समित्या सम्मितः एव लक्षयितव्यः। तत्र छन्दसि प्रयोगदर्शनात्॥

## मतौ च। (१३६/३४८२)

मत्वर्थे च [11]सहस्रशब्दात् [12]घः प्रत्ययो भवति। सहस्रमस्य विद्यते [13]सहस्त्रियः। 'तपःसहस्राभ्यां विनीनी' (५.२.१०२/१९०९), '[14]अण् च' (५.२.१०३/१९१०) इत्यस्यापवादः॥

## सोममर्हति यः। (१३७/३४८३)

निर्देशादेव समर्थविभक्तिः। सोमशब्दात् द्वितीयासमर्थात् अर्हति इत्येतस्मिन्नर्थे यः प्रत्ययो भवति। [15]सोमम् अर्हन्ति सोम्या ब्राह्मणाः (तै.सं. २.१.२.९)। [16]यज्ञार्हाः इत्यर्थः। [17]यति प्रकृते यग्रहणम्। [18]स्वरे विशेषः॥

---

1. योगविभागो – यत् नास्ति क. ई. 2. चकारात् नास्ति ब. क. फ. 3. या सरस्वती यशोभगीना या सरस्वती वेशोभगीना (सा. श्रौ. सू. 6.4.3) 4. वेशोभग्यः नास्ति फ. 5. यशोभगीनः यशोभग्यः नास्ति ब. ड.इ.फ.ह. 6. वाक्यमिदं नास्ति फ. 7. अद्भिः नास्ति फ. ज. 8. इति नास्ति ब. क. ई. 9. संमितः अ.क. ड.ह.इ. 10. सहस्रेण संमितः फ. 11. प्रथमासमर्थात् इत्यधिकम् फ. 12. घञ् ह. 13. सहस्रीयः ह. ज. 14. अण् च नास्ति फ. 15. सोममर्हति इति सोम्यः ब्राह्मणः ब. 16. यज्ञाङ्गाः क, याज्ञकः इ. 17. यत्-प्रकरणे यविधाने फ, यत्प्रकरणे यविधानम् ज. 18. स्वरविशेषणार्थम् ब, स्वरविशेषात् ज, स्वरविशेषार्थः ड. ई.